Sri Sathya Sai Books and Publications Trust,
Prasanthi Nilayam.

# श्री रुद्रम्

## 1st Anuvaka

Om Sri Sai Ram
RUDRAM
1ST ANUVAKA

ॐ नमो भगवते रुद्राय ॥
om namo bhagavate rudrāya ||

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
om namaste rudra manyava utota iṣave namaḥ |

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
namaste astu dhanvane bāhubhyāmuta te namaḥ |

या त इषुः शिवतमा शिवं बभूव ते धनुः ।
yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ |

शिवा शरव्या या तव तया नो रुद्र मृडय ।
śivā śaravyā yā tava tayā no rudra mṛḍaya |

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
yā te rudra śivā tanūraghorā'pāpakāśinī |

तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि ।
tayā nastanuvā śantamayā giriśaṁtābhicākaśīhi |

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
yāmiṣuṁ giriśanta haste bibharṣyastave |

शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत् ।
śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagat |

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
śivena vacasā tvā giriśācchāvadāmasi |

यथा नः सर्वमिज्जगदयक्ष्मग्ं सुमना असत् ।
yathā naḥ sarvamijjagadayakṣmagṁ sumanā asat |

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
adhyavocadadhivaktā prathamo daivyo bhiṣak |

अहीग्ंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ।
ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ |

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
asau yastāmro aruṇa uta babhruḥ sumaṅgalaḥ |

ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाग्ं हेड ईमहे ।
ye cemāgṁ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣāgṁ heḍa īmahe|

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
asau yo'vasarpati nīlagrīvo vilohitaḥ ।

उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।
utainaṁ gopā adṛśannadṛśannudahāryaḥ ।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
utainaṁ viśvā bhūtāni sa dṛṣṭho mṛḍayāti naḥ ।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe ।

अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः ।
atho ye asya sattvāno'haṁ tebhyo karannamaḥ ।

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नि योर्ज्याम् ।
pramuñca dhanvanastvamubhayorārtni yorjyām ।

याश्च ते हस्त इषवः परा ता भगवो वप ।
yāśca te hasta iṣavaḥ parā tā bhagavo vapa ।

अवतत्य धनुस्त्वगं सहस्राक्ष शतेषुधे ।
avatatya dhanustvagṁ sahasrākṣa śateṣudhe ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।

niśīrya śalyānāṁ mukhā śivo naḥ sumanā bhava |

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।
vijyaṁ dhanuḥ kapardino viśalyo bāṇavāgm uta |

अनेशन्नस्येषव आभुरस्य निषंगथिः
aneśannasyeṣava ābhurasya niṣaṁgathiḥ

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ |

तयाऽस्मान्, विश्वतस्त्वमयक्ष्मया परिब्भुज।
tayā'smān viśvatastvamayakṣmayā paribbhuja |

नमस्ते अस्त्वायुधायानातताय धृष्णवे।
namaste astvāyudhāyānātatāya dhṛṣṇave |

उभभ्यामुत ते नमो बाहुभ्यां तव धन्वने।
ubhabhyāmuta te namo bāhubhyāṁ tava dhanvane |

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
pari te dhanvano hetirasmānvṛṇaktu viśvataḥ |

अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥
atho ya iṣudhistavāre asmannidhehi tam ||

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय  सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya  sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ||